(अप्सरोभेदे, स्त्री। यथा, हरिवंशे।२१८।४७।
"कामा शारद्वती चैव मौनेयास्सरसः स्मृताः॥")
मौरजिकः, त्रि, (मुरजमद्दादनं शिल्पमस्य।
मुरज+"शिल्पम्।"४।४।५५। इति ठक्।)
मुरजवादकः। इत्यमरः।२।१०।१३॥
मौर्ख्यं, क्ली, (मूर्खस्य भावः। मूर्ख+"वर्णदृढ़ा-
दिभ्यः ष्यञ् च।"५।१।१२३। इति ष्यञ्।)
जाद्यम्। इति हेमचन्द्रः।२।२२६॥ (यथा,
सुश्रुते शारीरस्थाने ४ अः।
"अनवस्थितता मौर्ख्यं भीरुत्वं सलिलार्थिता।")
मौर्व्वी, स्त्री, (मूर्व्वाया विकारः। मूर्व्वा+"अव-
यवे च प्राण्यौषधिवृक्षेभ्यः।" ४।३।१३५।
इति अण्। ङीप्।) धनुर्गुणः। इत्यमरः।
२।८।८५। (यथा, रघुः।१।१९।
"शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता॥")
अजमृङ्गी। इति रत्नमाला। कोंगा इति
भाषा॥ (मूर्व्वामयी। यथा, मनौ।२।४२।
"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य
मेखला।
क्षत्त्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी॥")
मौलः, पुं, (मूलं वेदेति। मूल+अण्।) भूस्वादे-
र्मूलज्ञाता। मोड़ल् इति भाषा। यथा,—
"यत् परम्परया मौलाः सामन्ताः स्वामिनं
विदुः।
तदन्वयस्यागतस्य दातव्या गोत्रजैर्महो॥"
इति दायतत्त्वम्॥
तस्य लक्षणं यथा,—
"ये तत्र पूर्व्वं सामन्ताः पश्चाद्देशान्तरं गताः।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिताः॥"
इति मिताक्षरा॥
(विजिगीष्वरिमध्योदासीनः। यथा, कामन्द-
कीये।८।३४।
"चत्वारः पार्थिवा मौलाः पृथङ्मित्रैः सहा-
ष्टकम्॥"
मूलभूते, त्रि। यथा, तत्रैव।८।२५। (याः।
"मौला द्वादश यावन्ता ह्यमात्याद्यास्तथा च
सप्ततिश्चाधिका ख्याताः सर्व्वं प्रकृतिमण्डलम्॥")
मौलिः, पुं, स्त्री, (मूल+सुतङ्गमादित्वात् इञ्।)
चूड़ा। (यथा, महाभारते। ६।५६।५।
"एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत्॥
शिरश्च राजसिंहस्य पादेन समलोड़यत्॥")
किरीटम्। (यथा, हरिवंशे।६७।३०।
"इयञ्च सा मया मौलिराहृता वरुणालयात्॥")
संयतकेशः। इत्यमरः।३।३।१६२। (यथा,
रघौ।७।६६।
"स चापकोटीनिहितैकबाहुः
शिरस्त्रनिष्कर्षणभिन्नमौलिः।
ललाटबद्धश्रमवारिबिन्दुः
भीतां प्रियामेत्य वचो बभाषे॥")
मस्तकम्। इति हेमचन्द्रः।३।२।२३०॥
(यथा, आर्य्यासप्तशत्याम्।४२४।
"भालनयनेन्दुमौलौ गात्रे भुजङ्गमणि-
दीपाः॥"
प्रधानः। यथा, मार्कण्डेये।५६।१४।
"मौलयस्ते महाकायाः शाकपोतकरम्भकाः॥")
मौलिः, पुं, (मूलस्यादूरभवः। मूल+सुतङ्ग-
मादित्वादिञ्।) अशोकवृक्षः। इति मेदिनी।
मौलिः, स्त्री, (मूले जाता। मूल+इञ्।)
भूमिः। इति मेदिनी॥
मौलिकः, पुं, (मूले आद्ये जातः। मूल+ठञ्।)
कुलीनभिन्नः। यथा राढ़ीयवारेन्द्रब्राह्मणस्य
श्रोत्रियः तथा कायस्थस्य मौलिकः। एवं दाक्षि-
णात्यवैदिकब्राह्मणस्य अन्यपर्य्यायपरिचितापि तत्-
पदवाच्यः। वङ्गजकायस्थस्य स च मध्यल्यशब्द-
वाच्यः। यथा। अथ मध्यल्यलक्षणमाह।
मध्यल्यशब्दो रूढ़ इत्यन्यः। डित्थडवित्थवत्।
मध्यल्यः कुलमध्यस्थकुलीनस्य विश्रामस्थल-
मित्यर्थः। मध्यल्यशब्दस्य लक्षणान्तरम्। कुली-
नेतरसिद्धवंशजातकत्वे सति दशपुरुषावधि
अनवच्छिन्नकुलार्थकत्वं मध्यल्यत्वम्। स च
द्विविधः। सिद्धः साध्यश्च। सिद्धत्वं प्रकृत-
मध्यल्यत्वम्। प्रकृतसिद्धवंशजातत्वे सति दश-
पुरुषावधिकुलार्थकत्वं सिद्धत्वम्। सिद्धपदा-
काङ्क्षित्वे सति दशपुरुषावधिकुलार्थकत्वं साध्य-
त्वम्। अस्य प्रशंसामाह।
"कुलीनकुलरक्षार्थं विवाहेषु मीमांसया।
एतेषां शुभमाश्रित्य मध्यल्यः कुलसत्तमः॥"
इति कुलदीपिका॥*॥
दक्षिणराढ़ीयकायस्थस्याष्टकमौलिका यथा,—
"गौड़ेन्द्रौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका
ये हि सिद्धा-
स्ते दत्ताः सेनदासाः करगुहवरपालिताःपालिताः
सिंहदेवाः।
ये वा पद्माभिसुखाः स्थितिविनययुषः सप्ततिस्ते
हिपूर्व्वा
मित्राद्या घोष राशा परवगुरुयुता मौलिक-
त्वेन साध्याः॥"
अपि च।
"सेनो दत्तः करो शैयो दासो देवः प्रतिष्ठितः।
पालितः सिंहधर्म्मश्च गुहः सप्तमौलिकाः
स्मृताः॥"*॥
द्विसप्ततिसाध्यमौलिका यथा,—
"होड़ः खरधरधरणी वाम
आयिच सोमः पैयर नाम।
भञ्जो बिन्दो गुह इन्द्र सोध:
शर्म्मा वर्म्मा कुण्ड भूंयि चन्दः॥
बड़ो रक्षित राजादित्यौ
विष्णुर्नागः खिल पिल पूतः।
इन्दो गुप्तः पालो भद्र
श्रोमश्चाङ्कुर वन्धुर नाथः॥
शर्म्मांयिर्हेशो मानो गन्धो
दाहा दाया दाहुत साना।
दाहा दाना गण उपमाना॥
स्याम: चोमो घर वै श्रोष:
वीदस्तेजस्वार्णव आशः।
शक्तिर्भूतो ब्रह्मो शाणः
चैमो हैमो बर्द्धन रङ्गः।
गुरः कीर्त्तिर्यशः कुण्डो
नन्दी शौणो धनुर्गुणः॥"
इति द्विसप्ततिमौलिकाः॥*॥
अन्यच्च।
"देवो भूदेवभक्तो गुहघड़शगुणो दाम ईशान-
दासः
सेनो दत्तः सुदत्तामहितजनचयः पालितो
धर्म्मपालः।
सिंहः सिंहप्रतापः क्षितिनिकरकरादानदक्षः
करोऽष्टौ
गौड़ेन्द्रौ संस्थितास्ते गुणगणनिपुणा मौलिक-
त्वेन सिद्धाः॥*॥
होड़वामधरशौण्डिलसोमा
भञ्जविन्दगुहराजराहुताः।
बड़पालबलनामराक्षता
सोधशर्म्मभुंयिवर्म्मबन्धराः॥
चन्द्रशर्म्मायिगुणिभद्रपैसुरा
गन्धगुप्तधरकीर्त्तिवर्द्धनाः।
श्यैमहैमगणनाथविष्णवो
ब्रह्मरङ्गपिलकुण्डधनुर्गुणाः॥
तेजोऽर्णवखरधरायिच शक्तिभूताः
श्योमौष शाण विदशौल यशोम नन्दी।
दाहाङ्कुरेन्द्रशुभकुण्डमनोपमाना
दानाशगूतविदिता भुवि कीर्त्तिमन्तः।
देशादिष्टौ राज राहा साना च स्यामक-
स्तथा।
द्विसप्ततिमिताः साध्या मौलिका विदिताः
क्षितौ॥"
इति कुलाचार्य्यकारिका॥*॥
(देशविशेषः। यथा, मार्कण्डेये।५७।४८।
"मौरिका मौलिकाश्चैव अश्मका भोग-
वर्द्धनाः॥")
त्रि, मूलसम्बन्धिनि मौलसम्बन्धिनि च॥ (भार-
भूतं मूलं हरति वहत्यावहति वा। मूल+
"तद्धरति वहत्यावहति भाराद् वंशादिभ्यः।"
५।१।५०। इति ठञ्। मूलभारहारके मूलभार-
वाहके मूलभारानेतरि च। इति व्याकरणम्॥)
मौषलं, क्ली, (मुषलमिव। मुषलस्येदमिति वा।
मुषल+अण्।) मुषलवत्। यथा,—
"गङ्गायां मौषलं स्नानं महापातकनाश-
नम्।"
इति प्रायश्चित्ततत्त्वधृतभविष्यपुराणवचनम्॥
महाभारतस्याष्टादशपर्व्वान्तर्गतपर्व्वविशेषः।
यथा,—
"मौषलं पर्व्व चोद्दिष्टं ततो घोरं सुदारुणम्।
महाप्रास्थानिकं पर्व्व स्वर्गारोहणिकं ततः॥"
इति महाभारते आदिपर्व्व॥
मुषलसम्बन्धिनि, त्रि॥